।। श्रीनरसिंहस्तुति।।

उदयरविसहस्रद्योतितं रूक्षवीक्षं प्रलयजलधिनादं कल्पकृद्वह्निवक्त्रम् ।
सुरपतिरिपुवक्षश्छेदरक्तोक्षितांगं प्रणतभयहरं तं नारसिंहं नतोऽस्मि ।

प्रळयरविकराळाकाररुक्चक्रवालं विरळयदुरुरोचीरोचिताशांतरालं ।
प्रतिभयतमकोपात्युत्कटोच्चाट्टहासिन् दहदह नरसिंहासह्यवीर्याहितं मे ।।१।।

सरसरभसपादापाताभाराभिरावप्रचकितचलसप्तद्वंद्वलोकस्तुतस्त्वम् ।
रिपुरुधिरनिषेकेणेव शोणांघ्रिशालिन् दहदह नरसिंहासह्यवीर्याहितं मे ।।२।।

तव घनघनघोषो घोरमाघ्रायजंघा परिघमलघुमूरुव्याजतेजोगिरिं च ।
घनविघटितमागाद्दैत्यजंघालसंघो दहदह नरसिंहासह्यवीर्याहितं मे ।।३।।

कटकिकटकराजद्धाटकाग्र्यस्थलाभा प्रकटपटतटित्ते सत्कटिस्थाऽतिपट्वी ।
कटुककटुक दुष्टाटोपदृष्टिप्रमुष्टौ दहदह नरसिंहासह्यवीर्याहितं मे ।।४।।

प्रखरनखरवज्रोत्खातरूक्षारिवक्षः शिखरिशिखररक्तैराक्तसंदोहदेह ।
सुवलिभशुभकुक्षे भद्रगंभीरनाभे दहदह नरसिंहासह्यवीर्याहितं मे ।।५।।

स्फुरयति तव साक्षात्सैव नक्षत्रमाला क्षपितदितिजवक्षोव्याप्तनक्षत्रमार्गम् ।
अरिदरधर जान्वासक्तहस्तद्वयाहो दहदह नरसिंहासह्यवीर्याहितं मे ।।६।।

कटुविकटसटौघोद्घट्टनाद्भ्रष्टभूयोघनपटलविशालाकाशलब्धावकाशम् ।
करपरिघविमर्दप्रोद्यमं ध्यायतस्ते दहदह नरसिंहासह्यवीर्याहितं मे ।।७।।

हठलुठदलघिष्ठोत्कंठदष्टोष्ठविद्युत्सटशठकठिनोरः पीठभित्सुष्ठु निष्ठाम् ।
पठति नु तव कंठाधिष्ठघोरांत्रमाला दहदह नरसिंहासह्यवीर्याहितं मे ।।८।।

हृतबहुमिहिराभासह्यसंहाररंहो हुतवहबहुहेतिह्रेषिकानंतहेति ।
अहितविहितमोहं संवहन्सैंह्यमास्यं दहदह नरसिंहासह्यवीर्याहितं मे ।।९।।

गुरुगुरुगिरिराजत्कंदरांतर्गते वा दिनमणिमणिशृंगे वांतवह्निप्रदीप्ते ।
दधदतिकटुदंष्ट्रे भीषणोज्जिह्ववक्त्रे दहदह नरसिंहासह्यवीर्याहितं मे ।।१०।।

अधरितविबुधाब्धिध्यानधैर्यं विदीध्यद्विविधविबुधधीश्रद्धापितेंद्रारिनाशम् ।
विदधदतिकटाहोद्घट्टनेद्धाट्टहासं दहदह नरसिंहासह्यवीर्याहितं मे ।।११।।

त्रिभुवनतृणमात्रत्राणतृष्णं तु नेत्रत्रयमतिलघिताचिर्विष्टपाविष्टपादम् ।
नवतररविताम्रं धारयन् रूक्षवीक्षं दहदह नरसिंहासह्यवीर्याहितं मे ॥१२॥

भ्रमदभिभवभूभृद्भूरिभूभारसद्भिद्भिदनवविभवभ्रूविभ्रमादभ्रशुभ ।
ऋभुभवभयभेत्तर्भासि भोभो विभाभिर्दहदह नरसिंहासह्यवीर्याहितं मे ॥१३॥

श्रवणखचितचंचत्कुंडलोल्लासिगंड भृकुटिकटुविलासश्रेष्ठनासारुणोष्ठ ।
वरद सुरद राजत्केसरोत्सारितारे दहदह नरसिंहासह्यवीर्याहितं मे ॥१४॥

प्रविकचकचराजद्रत्नकोटीरशालीन् गलगतगलदुस्रोदाररत्नांगदाढ्य ।
कनककटककांचीशिंजिनीमुद्रिकावन् दहदह नरसिंहासह्यवीर्याहितं मे ॥१५॥

अरिदरमसिखेटौ बाणचापे गदां सन्मुसलमपि दधानः पाशवर्यांकुशौ च ।
करयुगळधृतांत्रस्रग्विभिन्नारिवक्षो दहदह नरसिंहासह्यवीर्याहितं मे ॥१६॥

चटचटचट दूरं मोहयन् भ्रामयारिन् कडिकडिकडि कायं ज्वालय स्फोटयस्व ।
जहिजहिजहि वेगं शात्रवं सानुबंधं दहदह नरसिंहासह्यवीर्याहितं मे ॥१७॥

विधिभवविबुधेशभ्रामकाग्निस्फुलिंग प्रसविविकटदंष्ट्रोज्जिह्ववक्त्रत्रिनेत्र ।
कलकलकल कामं पाहि मां ते सुभक्तं दहदह नरसिंहासह्यवीर्याहितं मे ॥१८॥

कुरुकुरु करुणां त्वं सांकुरां दैत्यपोते दिशदिश विशदां मे शाश्वतीं देवदृष्टिम् ।
जयजय जयमूर्तेऽनार्त जेतव्यपक्षं दहदह नरसिंहासह्यवीर्याहितं मे ॥१९॥

स्तुतिरियमहितघ्नी सेविता नारसिंही तनुरिव परिशांता मालिनी साऽभितोऽलम् ।
तदखिल गुरुमाग्र्यश्रीदरूपा लसद्भिः सुनियमनयकृत्यैः सद्गुणैर्नित्ययुक्ता ॥२०॥

लिकुचतिलकसूनुः सद्धितार्थानुसारी नरहरिनुतिमेतां शत्रुसंहारहेतुम् ।
अकृतसकलपापध्वंसिनीं यः पठेत्तां व्रजति नृहरिलोकं कामलोभाद्यसक्तः ॥२१॥